IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# लघुपाणिनीयस्य सुबन्तप्रकरणसमीक्षा।

Poornima.B

Research Scholar,

Department of Sanskrit Vyakaramna,

Sree Sanskaracharya University of Sanskrit, Kalady, Kerala

## *Abstract:*

लघुपाणिनीयस्य सुबन्तप्रकरणसमीक्षा इति प्रबन्धे पाणिनीयव्याकरणस्य सूत्रपद्धतेः तथा प्रक्रियापद्धतेः विशेषताम् विवेच्य राजराजवर्मणा विरचिते लघुपाणिनीये प्रक्रियाग्रन्थेषु नवीनशैलीम्
प्रदर्श्यते। लघुपाणिनीयस्य पूर्वखण्डे शिक्षाकाण्डः परिनिष्ठाकाण्डः, निरुक्तकाण्डः, आकाङ्क्षाकाण्डः च मुख्यतः निरूपिताः, तस्मिन् सुबन्तप्रकरणे संज्ञा-सन्धि-प्रत्ययादेश अङ्गकार्यप्रकरणानि इति उपविभागाः
निरूपिताः। प्राचीनप्रक्रियाग्रन्थेभ्यः भिन्नतया प्रक्रिया प्रदर्शिता, नामरूपावली च प्रकरणान्ते प्रदर्शिता ।
आधुनिकशिक्षापद्धतिसमन्वितं विषयविभागेन राजराजवर्मणा नूतनप्रस्थानं प्रथापितम्, येन पाणिनीयव्याकरणस्य अध्ययनं स रलं भवति/

***Index Terms* - *लघुपाणिनीयम्, पाणिनीयव्याकरणम्, प्रक्रियापद्धतिः, सुबन्तप्रकरणम्***

## I. INTRODUCTION

पाणिनीयव्याकरणस्य द्वौ प्रकारकौ अध्ययनपद्धती प्रचलतः।सूत्रपद्धतिः अथवा काशिकापद्धतिः तथा प्रक्रियापद्धतिश् च अष्टाध्यायीसूत्रक्रमेण सूत्रार्थः उदाहरण-प्रत्युदाहरणानि, वर्तिकानि, गणपाठादीनामध्ययनं क्रियते तदर्थं सर्वाश्रयणीया भवति काशिका इत्यतः इयं पद्धतिः काशिक ापद्धतिः इति व्यवह्रियते।

अष्टाध्यायीसूत्राणि प्रकरणशः विभज्य प्रयोगसाधुत्वाय आवश्यकानि सूत्राणि, सार्थेन उदाहरण-प्रत्युदाहरण - वार्तिकादि अंशान् प्रत्येके सूत्रे प्रतिपादनमेव प्रक्रियापद्धत्याः सविशेषता। प्रक्रियाग्रन्थानामाविर्भावेन व्याकर णशात्राध्ययने महान् परिवर्तनः सञ्जातः।अस्यां प्रक्रियापद्धत्यां A.R राजराजवर्मणा विरचितस्य लघुपाणिनीयस्य सविशेष तां विद्यते प्रक्रियाग्रन्थलक्षणानुसारम् आधुनिककाले विरचिते ग्रन्थेऽस्मिन् प्रकरणप्रतिपादनशैली भिन्ना, नूतना च वर्तते अस्मिन् ग्रन्थे राजराजवर्मणा प्रक्रियापद्धत्यां कालानुसृतपरिवर्तनानि आवश्यकानि इति विचिन्त्य काशिकापद्धत्यां तथा प्रक्र

ियापद्धत्यां दृश्यमानान् दोषान् उपेक्ष्य नवीनमेकं प्रस्थानमाष्कृतम्। लघुपाणिनीये काशिकापद्धतिः – कौमुदीपद्धतिः इति प्राचीनप्रस्थानद्वयस्य संमिश्रः मार्गः गृहीतः।

## II. MAIN CONTENT

A.R राजराजवर्मणा विरचितं लघुपाणिनीयं पूर्वोत्तरखण्डाभ्यां विभज्य प्रकाशितः।
१९११ तमे वर्षे पूर्वखण्डः. तथा १९१३ तमे वर्षे उत्तरखण्डः च प्रकाशितः। ग्रन्थेऽस्मिन् विषयविभागः न केवलं प्रक्रियादृष्ट्या प्रकरणशः अपि च आधुनिकभाषाशास्त्राधारेण कृतः। यद्यपि भाषाशास्त्राधारेण संस्कृतव्याकरणग्रन्थाः आङ्गलभाषादिषु द्रष्टुं शक्यते तथापि संस्कृतभाषायां पाणिनीयव्याकरणस्य भाषाशास्त्रसमन्वितेन विरचितः प्रथमः ग्रन्थः भवति लघुपाणिनीयम्। लघुपाणिनीये अष्टाध्याय्याः सर्वाणि सूत्राणि न व्याख्यातानि। पूर्वखण्डे १७६५ सूत्राणि, उत्तरखण्डे १९४ वैदिक सूत्राणि च व्याख्यातानि।

पूर्वखण्डे मुख्यतया चत्वारः विभागाः सन्ति –
१. अक्षरनिरूपणपरः शिक्षाकाण्डः
२. शब्दानां रूपसिद्धिविचारकः परिनिष्ठाकाण्डः
३. शब्दानां व्युत्पत्तिप्रतिपादको निरुक्तकाण्डः
४. पदानामन्वयव्यवस्थावर्णनरुपः आकाङ्क्षाकाण्डः चेति

शिक्षाकाण्डः

प्रथमे शिक्षाकाण्डे संज्ञाप्रकरणं, परिभाषाप्रकरणं, सन्धिप्रकरणं, शब्दविभागः इति चत्वारः उपविभागाः सन्ति। अक्षरसम्बन्धिव्याकरणकार्याणि एव शिक्षाकाण्डस्य मुख्यप्रतिपाद्यविषयः। शास्त्राध्ययनं पारिभाषिकशब्दानां ज्ञानेन विना कठिनं वर्तते इत्यतः संज्ञाप्रकरणेन शिक्षाकाण्डः आरभते। संज्ञासूत्राणां व्याख्यानात् प्राक् लौकिकाक्षरमाला प्रदर्श्यते। तदनन्तरम् आमुखत्वेन वर्णाक्षरयोः भेदः, वर्णानां विभागः, इत्यादि भाषासम्बन्धि सामान्यकार्याणि उक्त्वा संज्ञासूत्राणि व्याख्यातानि । इदं शैली नूतना वर्तते। अन्येषु प्रक्रियाग्रन्थेषु पाणिनीयव्याकरणस्य मूलभूतानि माहेश्वरसूत्राणि प्रातिपाद्यन्ते। लघुपाणिनीये संज्ञाप्रकरणस्य मध्य एव माहेश्वराणि सूत्राणि उपन्यस्तानि।

संज्ञाप्रकरणे सर्वाणि संज्ञासूत्राणि न व्याख्यातानि, सन्धेः ज्ञानाय आवश्यकानि संज्ञासूत्राण्येव अस्मिन् प्रकरणे व्याख्यातानि । सुबन्तप्रक्रियायां उपयुक्ताः सर्वनाम , नदी, सर्वनामस्थान इत्यादि संज्ञाः सुबन्तप्रकरणे संज्ञा इति पुनरपि विभागे व्याख्याताः। संज्ञाप्रकरणान्तरं लाघवाय सन्देहनिवारणाय च शास्त्रेषु स्वातन्त्र्येण निबद्धानि परिभाषासूत्राणि परिभाषाप्रकरणमिति द्वितीये उपविभागे व्याख्यातानि।

सन्धिप्रकरणमिति तृतीये उपविभागे सन्धिसूत्राणि व्याख्यातानि। प्रकृतिप्रत्यययोः, पदयोः मेलनेन पूर्वान्त्यवर्णस्य , परादिवर्णस्य, उभयोः ये विकाराः उत्पद्यन्ते, तानि सन्धिकार्याणि इति राजराजवर्मा अभिप्रैति। सन्धिः त्रिधा विभज्यते

१, पदमध्यसन्धिः(प्रकृति - प्रत्यय )
२. पदान्तसन्धिः (एङः पदान्तादति)
३. उभयसन्धिः (इको यणचि ,एचोऽयवायावः, आद्गुणः, वृद्धिरेचि , अकः सवर्णे दीर्घः)

स्वरविकार्याः स्वरसन्धिः. व्यञ्जनविकार्याः व्यञ्जनसन्धिः अथवा हल्सन्धिः।स्वरसन्धौ स्वरनिषेधस्य प्रकृतिभावस्यापि व्याख्यानं कृतम्। हल्सन्धिरिति विभागे हल्सन्धिः, विसर्गसन्धिः, स्वादिसन्धिरपि व्याख्यातानि।सिद्धान्तकौमुद्यादि प्रक्रियाग्रन्थेषु उदाहरणं लक्षीकृत्य सन्धिसूत्राणि घटितानि भवन्ति।परन्तु लघुपाणिनीये सूत्रस्य उदाहरणार्थं यदापेक्षितं तदेव उदाह्रियते।

प्रक्रियाग्रन्थेषु शब्दविभागो नाम प्रकरणं नूतनं वर्तते। शब्दविभागे प्रकृतेः विभागः(प्रातिपदिकं, धातुः), पदस्य विभागः इत्यादि विषयाः व्याख्यातानि।अमुं विषयमधिकृत्य रचितानि सूत्राणि भिन्नप्रकरणेषु अन्यप्रक्रियाग्रन्थेषु प्रतिपादितानि।

परिनिष्ठाकाण्डः

पदार्थस्य ज्ञानेन विना वाक्यार्थज्ञानं न संभवति। वाक्यार्थस्य पदज्ञानस्य अपेक्षा वर्तते। अतः आदौ पदज्ञानमावश्यकम्।तच्च पदं वैयाकरणमते द्विविधं, सुबन्तं, तिङन्तं च
। अतः पदनिष्पत्तिरेव द्वितीयकाण्डस्य प्रतिपाद्यविषयः। सुप्तिङन्तं पदमिति सूत्रक्रममनुसृत्य सुबन्तानां पदनिष्पत्तिरेव आदौ करणीया। परन्तु पदस्य प्रकृतेः प्रातिपदिकानां लिङ्गभेदं वर्तते। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषा वर्तते। अतः लिङ्गव्यवस्थानिरूपणानन्तरमेव सुबन्तप्रक्रियायाः निरूपणं लघुपाणिनीये कृतम्। अस्य लिङ्गप्रकरणस्य नाम स्त्रीप्रत्ययप्रकरणमिति अन्येषु प्रक्रियाग्रन्थेषु स्वीकृतं भवति। तच्च सुबन्तप्रकरणान्तरमेव व्याख्यातम्। लघुपाणिनीये सुबन्तप्रक्रिया संज्ञा, सन्धिकार्याणि, प्रत्ययानामदेशः, अङ्गकार्याणि इत्यादि उपविभागेषु विभज्य व्याख्याता। तिङन्तप्रक्रिय ा लकाराणां सार्वधातुक -
आर्धधातुक भेदौ कृत्वा व्याख्यातानि। अर्थात् विकरणभेदवतां लट्- लङ् - लोट् - लिङां प्रक्रिया प्रदर्श्यते। एकस्य धातुगणस्य चतुर्णां सार्वधातुकलकाराणां प्रक्रिया प्रदर्श्य , अन्य गणस्य रूपाणि निरूपयन्ति। धातुगणक्रमे भिन्नः क्रमः स्वीकृत ः। भूवादि, तुदादि, दिवादि, स्वादि, तनोत्यादि, क्र्यादि, रुधाति, अदादि, जुहोत्यादि इति। पुनः आर्धधातुकलकाराणां प्रक्रिया प्रदर्शिता । व्युत्पन्नधातवः,पदव्यवस्था, कृत्प्रकरणम्, लकारार्थप्रकरणम्, विभक्त्यर्थप्रकरणम् इत्यादि प्रकरणानि परिनिष्ठाकाण्डे निरूपितानि।

निरुक्तकाण्डः

तृतीये निरुक्तकाण्डे शब्दनिष्पत्तिविषयाः व्याख्याताः। कृत्प्रत्ययैः निष्पन्नमानानि कृदन्तरूपाणि एवं तद्धितप्रत्ययैः निष्पन्नमानानि तद्धितरूपाणि एव अस्य निरुक्तकाण्डस्य प्रतिपाद्यविषयः। किन्तु प्रसङ्गवशात् परिनिष्ठाकाण्डे कृदन्तानां निरूपणं कृतम्। अतः निरुक्तकाण्डेऽस्मिन् तद्धितविधायकानि सूत्राणि व्याख्यातानि।

आकाङ्क्षाकाण्डः

पदानां परस्पराकाङ्क्षायां समासपदानि उत्पाद्यन्ते। अतः आकाङ्क्षाकाण्डे समासविधायकानि सूत्राणि व्याख्यातानि। व्युत्पनानां पदानां परस्परान्वये विहितानि समासविधायकानि सूत्राणि अष्टाध्यायी क्रमेण व्याख्यातानि। एवं पूर्वखण्डः समाप्तः।

पाणिनीयव्याकरणस्य द्वौ प्रकारकौ अध्ययनपद्धती प्रचलतः। सूत्रपद्धतिः अथवा काशिकापद्धतिः तथा प्रक्रियापद्धतिश्च । अष्टाध्यायीसूत्रक्रमेण सूत्रार्थः, उदाहरण -प्रत्युदाहरणानि , वर्तिकानि, गणपाठादीनामध्ययनं क्रियते। तदर्थं सर्वाश्रयणीया भवति काशिका इत्यतः इयं पद्धतिः काशिकापद्धतिः इति व्यवह्रियते।

## III. RESULTS AND DISCUSSION

सुबन्तप्रकरणसमीक्षा

प्रक्रियाग्रन्थेषु प्रायेण सन्धिप्रकरणानन्तरं सुबन्तपदानां प्रक्रिया निरूपिता। रूपावतारे अस्य प्रकरणस्य नाम विभक्त्यवतारः इति धर्मकीर्तिना कृतः। विभक्त्यवतारे अजन्तपुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गाः, हलन्तपुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गाः इति विभागाः कृताः। अजन्तप्रकरणं मातृकावर्णक्रमेण निरूपितम्, हलन्तप्रकरणं वर्णसमाम्नायक्रमेण च निरूपितम्। हलन्तप्रकरणे अलिङ्गप्रकरणमिति उपविभागः अपि कृतः। तस्मिन् अलिङ्गप्रकरणे अस्मद्-युष्मद् शब्दयोः प्रक्रिया प्रदर्शिता। रूपावतारे बौद्धाचार्येण धर्मकीर्तिना ईश्वरसम्बन्धपदानि न स्वीकृतानि, तत्स्थाने वृक्ष, कवि, कारुः इत्यादिनिपदानि स्वीकृतानि। प्रक्रियाप्रदर्शनवेलायां आदौसुप्प्रत्ययानां योजनात् पूर्वं कारकविभक्तिसूत्राणि व्याख्याय तदनन्तरमेव प्रक्रिया प्रदर्श्यते।

रूपमालायां सुबन्तप्रक्रिया अजन्तमाला, हलन्तमाला, नियतलिङ्गमाला, सर्वनाममाला इति चर्तुर्षु विभागेषु प्रदर्शिता। नियतलिङ्गमालायां सखि, पति, क्रोष्टु, वर्षभू, नृ इत्यादि अजन्तपुंलिङ्गरूपाणि, तुरासाड्, अर्वन्, मघवन्, श्वन्, पथिन्, इत्यादिहलन्तपुंलिङ्गरूपाणि, जरा, बुद्धिः, स्त्री, लक्ष्मीः, तन्त्रीः, इत्यादयः अजन्तस्त्रीलिङ्गरूपाणि, सीमन्, अप्, आशिष् इत्यादि हलन्तस्त्रीलिङ्गरूपाणि नपुंसकलिङ्गे वारि, मधु, अस्थि, इत्याद्यजन्तरूपाणि, हविष्, धनुष्, इत्यादिहलन्तरूपाणि च निरूपिताः।

प्रक्रियाकौमुद्यां, सिद्धान्तकौमुद्यां च सुबन्तप्रक्रिया प्रयेण समाना वर्तते। प्रातिपदिकानां अन्त्यवर्णानुसारेण द्वौ विभागौ कृतौ। अजन्तशाब्दाः, हलन्तशब्दाश्च। ततः लिङ्गानुसारेन अजन्तहलन्तयोः त्रीन् विभागान् विधाय सुबन्तस्य षट् विभागाः कृताः। अजन्तप्रतिपतिकानाम् अकारादिक्रमः आश्रितः। हलन्तप्रातिपदिकानां वर्णसमाम्नायक्रमः च आश्रितः।

लघुपाणिनीये सुबन्तप्रकरणस्य निरूपणम् अन्येभ्यः प्रक्रियाग्रन्थेभ्यः भिन्नः भवति।सुबन्तप्रकरणे प्रक्रियानिर्वाहात् पूर्वं औकारान्तः पुंलिङ्गः ग्लौ शब्दः, तथा दकारन्तः स्त्रीलिङ्गः संपद् शब्दयोः सर्वेषां रूपाणां प्रक्रिया प्रदर्यते। अनेन शब्दयोः प्रक्रियानिर्वाहार्थं शिक्षाकाण्डे पठितानां सूत्राणामेव आवश्यता वर्तते। प्रक्रियाग्रन्थेषु क्रमशिक्षासिद्धान्तस्य प्रायोगिकदृष्ट्या लघुपाणिनीये समावेशितः। अनेन छात्राणां प्रक्रियाकरणे अवबोधः प्राप्स्यते।

लघुपाणिनीये अजन्तहलन्तविभागाभ्यां पुं-स्त्री-नपुंसकभेदेन प्रक्रिया न प्रदर्शिता। परं संज्ञा, सन्धिकार्याणि, प्रत्ययानामादेशः, अङ्गकार्याणि इति चत्वारः मुख्यविभागाः कृताः। अथ प्रकरणान्तरविहितानि कार्याणि, भसंज्ञाकार्याणि, णत्वप्रकरणं, षत्वप्रकरणं, युष्मद्-अस्मद् प्रक्रिया इत्यादि उपविभागाः च कृताः।विषयविभागे का युक्तिः इति चेत् सुब्रन्तप्रक्रिया प्रातिपदिकस्य लिङ्गमाश्रित्य न प्रवर्तते। परं सर्वनामस्थानसंज्ञा, पद, भ, नदी, घि इत्यादि संज्ञमाश्रित्य प्रवर्तते। अस्य आधारेण सुबन्तप्रकणं लघुपाणिनीये निरूपितम्। प्रत्येकस्य प्रातिपदिकस्य सर्वेषां रूपाणां प्रक्रिया निरूपणान्तरम् अन्यप्रातिपदिकशब्दानां प्रक्रिया इति शैली नास्ति। परं पूवोक्त क्रमेण सुबन्तप्रक्रिया प्रदर्शिता। किन्तु प्रकरणस्य अन्ते नामरूपावलिः प्रदर्शिता। अस्यां सामान्यशब्दानां प्रकिया एकत्र मिलित्वा प्रदर्शित्ता। सामान्यशब्दारूपाणि भिन्नेषु उपविभागेषु प्रदर्शितानि इत्यतः एकस्य शब्दस्य सर्वेषां रूपाणां युगपत् ज्ञानाय छात्राणां क्लेशं निवारयितुं नामरुपावलिः कृता।

# IV. CONCLUSION

अष्टाध्याय्यादिप्राचीनग्रन्थाः श्रुतिपरम्परामनुसृत्य सहस्रेभ्यः वर्षेभ्यः प्राक् विरचिताः। तस्मिन् काले या शिक्षापद्धतिः विद्यमाना आसीत् सा तु इदानीं परिवर्तिता भवति। आधुनिककाले लेखनसंप्रदायस्य, मुद्रणव्यवस्थायाः, गवेषणादीनां फलेन शिक्षापद्धत्यां बहुविधाः नूतनाशयाः आगताः। एतादृशाशयाः कथं लघुपाणिनीये समन्वितं इत्येन प्रबन्धेन लक्षीक्रियते । लघुपाणिनीयस्य प्रकरणपरासमीक्षायाम् अवगन्तुं शक्यते यत् विषयविभागे , प्रतिप्रकरणे सूत्राणां क्रमे, उदाहरणेषु च राजराजवर्मणा नूतनशैलीम् आविश्कृता, तथा हि रीतिशास्त्रमनुसृत्य ग्रन्थरचना संप्रदाये अनेके सिद्धान्ताः वर्तन्ते। एतादृशानां सिद्धान्तानां प्रयोगेण प्रतिपाद्यमानस्य ग्रन्थस्य अवगमने छात्राणां महत् उपयोगित्वं वर्तते।

# REFERENCES

**[1]** Rajavarma, A. R. 1990. Laghupaniniyam. University of Kerala.

**[2]** Rangacharya, M. (Ed.). 1927. Rupavatara (Parts 1 and 2, by Dharmakirti). G. A. Natesan & Co.

**[3]** Shiv Dutt. 2011. Siddhanta kaumudi with the Tattvabodhini commentary. Chaukhambha Vidya Bhawan.

**[4]** Vimalasaraswati. 1973. Roopamaala (Ed. by Keshav Dev Sastri). Motilal Banarsidass Publishers.